तालुषके श्रोणीफलके च विनिर्द्दिशेत् । भगास्थ्येकं तथा पृष्ठे चत्वारिंशच्च पञ्च च । ग्रीवा पञ्चदशास्थिः स्याज्जत्र्वेकैकं तथा हनुः । तन्मूले द्वे ललाटाक्षिगण्डे नासा घनास्थिका । पार्श्वकाः स्थालकैः सार्द्धमर्वुदैश्च द्विसप्ततिः । द्वौ शङ्खकौ कपालानि चत्वारि शिरसस्तथा । उरःसप्तदशास्थीनि पुरुषस्यास्थिसंग्रहः” “अस्थिभिरस्थीनि मांसैर्मांसानि त्वचा त्वचम्” इति श्रुतिः “मलमूत्रपुरीषास्थि निर्गतं ह्यशुचि स्मृतम्” मनुः अल्पार्थे कन् । अस्थिकं तत्रार्थे ।

**अस्थिकृत्** पु० कृ—क्विप् ६त० । अस्थिकारके मेदसि धातौ । यथा मेदसोऽस्थिकरत्वं तथोक्तम् अस्रक्करशब्दे ५५८पृष्ठे ।

**अस्थिच्छलित** न० “काण्डकमश्वकर्णं चूर्णितं पिच्चितमस्थिच्छलितं काण्डभग्नं मज्जानुगतमतिपातितं वक्रं छिन्नं पाटितं स्फुटितमिति द्वादशविधमिति” काण्डभग्नमुपक्रम्य “पार्श्वयोरस्थिहीनोन्नतमस्थिच्छलितमिति” सुश्रुतोक्ते काण्डभग्नरूपरोगनिदानभेदे ।

**अस्थिज** पु० अस्थ्नो जायते जन—ड । अस्थिधातोर्जाते मज्जनि यथा चास्थ्नोमज्जजन्म तथोक्तमस्रक्करशब्दे ५५८ पृष्ठे ।

**अस्थिति** स्त्री अभावे न०त० । १स्थित्यभावे अस्थैर्य्ये । “अस्थितेश्च शरीरस्य पुंसां चैवायुषः क्षयात् । आनन्त्यात् कुलधर्म्माणां द्वादशाहः प्रशस्यते” इति स्मृतिः । अस्थितिः सङ्गीतमुरजध्वनीनाम्” काद० । २मर्य्यादाभावे । न०ब० । ३मर्य्यादाशून्ये ४स्थैर्य्यशून्ये च त्रि० ।

**अस्थितुण्ड** पु० अस्थीव कठिनं तुण्डमस्य । विहङ्गमे ।

**अस्थिधन्वन्** पु० अस्थि अस्थिमयं धनुरस्य अनङ् समा० । शिवे । [पिञ्जराकारे कङ्काले ।

**अस्थिपञ्जर** पु० अस्थि पञ्जर इव । शरीरस्यास्थिसंहतौ

**अस्थिप्रक्षेप** पु० मृतस्यास्थ्नां गङ्गाजले विधानेन प्रक्षेपः । विधानेन मृतस्यास्थ्नां गङ्गाजले क्षेपणे । तत्प्रकारश्च आदिपु० “भागीरथी यत्र यत्रास्ति तीर्थे कुलद्वये चापि यदा विपन्नः । तदा तदा तत्र तस्याथ भक्त्या भावेन चास्थीनि विनिक्षिपेच्च । स्नात्वा ततः गव्यगव्येन सिक्त्वा हिरण्यमध्वाज्यतिलैश्च योज्य । ततश्च मृत्पिण्डपुटे निधाय पश्यन् दिशं प्रेतगणोपगूढाम् । नमोऽस्तु धर्म्माय वदन् प्रविश्य जलं स मे प्रीत इति क्षिपेच्च । उत्थाय भास्वन्तमवेक्ष्य सूर्य्यं स दक्षिणां विप्रमुखाय दद्यात्” । “एतदूर्द्ध्वं तीर्थचिन्तामणौ अन्यथा पठितम्” तद्यथा । ‘स्नात्वा-तथोत्तीर्य्य च भास्करञ्च दृष्ट्वा प्रदद्यादथ दक्षिणान्तु” इति । “एवं कृते प्रेतपुरस्थितस्य स्वर्गे स्थितिः स्याच्च महेन्द्रतुल्या” इति च । तत्प्रयोगश्च प्रा० त० दृश्यः ।

**अस्थिभक्ष** पु० अस्थि भक्षयति भक्ष—अण् । (हाड़गिला) १पक्षिणि, २कुक्कुरे च । भुज—क्विप् । अस्थिभुगादयोऽप्यत्र ।

**अस्थिभङ्ग** पु० अस्थ्नो भङ्गः । अस्थिभञ्जने “अस्थिभङ्गे गवाञ्चैव लाङ्गूलस्य च भेदने” स्मृतिः ।

**अस्थिमत्** त्रि० अस्थीनि सन्त्यस्य मतुप् । अस्थियुक्ते प्राणिनि “अस्थिमतां तु सत्त्वानां सहस्रञ्च प्रमाप्य च । पूर्णे चानस्यनस्थ्नां तु शूद्रहत्याव्रतं चरेत्” । किञ्चिदेव तु विप्राय दद्यादस्थिमतां वधे । अनस्थ्नां चैव हिंसायां प्राणायामेन शुध्यति” मनुः अस्थिमतां कृकलासादीनामनस्थ्नां मत्कुणादीनाम्” कुल्लू० । [निर्म्मिते अस्त्रादौ ।

**अस्थिमय** त्रि० अस्थ्नोविकारः मयट् स्त्रियां ङीप् । अस्थि

**अस्थिमाला** स्त्री अस्थिनिर्म्मिता माला । अस्थिनिर्म्मितगुटिकायां १मालायाम् ६त० । २अस्थिश्रेणौ च ।

**अस्थिमालिन्** पु० अस्थिमयी मालाऽस्त्यस्य इनि । शिवे ।

**अस्थियुज्** पु० अस्थि युनक्ति युज—क्विन् । (हाड़जोड़ा) हस्तिशुण्डावृक्षे । [ध्वजनाम्” काद० ।

**अस्थिर** त्रि० न०त० । स्थिरभिन्ने चञ्चले । “अस्थिरत्वं

**अस्थिविग्रह** पु० अत्यन्तकृशत्वात् अस्थिसारो विग्रहो देहोऽस्य । १शिवानुचरे भृङ्गरीटे । २अतिशीर्णदेहे त्रि० ।

**अस्थिशृङ्खला** स्त्री अस्थ्नां शृङ्खलेव योजनहेतुः । (हाड़जोड़ा) ग्रन्थिमति वृक्षे । “काण्डं त्वग्विरहितमस्थिशृङ्खलाया माषार्द्धं द्विदलमकञ्चुकं तदर्द्धम् । सम्पिष्टं सुतनु ! ततस्तिलस्य तैले संपक्वं वटकमतीव वातहारि” वैद्य० ।

**अस्थिशेष** त्रि० अस्थिमात्रं शेषोऽस्य । मांसादिशून्ये अतिकृशे ।

**अस्थिसंहार** पु० अस्थीनि संहरति योजयति सम्+हृ—अण् (हाड़जोड़ा) ग्रन्थिमति वृक्षे । “अस्थिसंहारकः प्रोक्तो वातश्लेष्महरोऽस्थियुक् । उष्णः सारः कृमिघ्नश्च दुर्नामघ्नोऽक्षिरोगजित् । रूक्षः स्वादुर्लघुर्वृष्यः पाचनः पित्तलः स्मृतः” भा० प्र० । [हृ—ण्वुल् । (हाड़जोड़ा) ग्रन्थिमति वृक्षे

**अस्थिसंहारिका** स्त्री अस्थीनि संहरति योजयति सम्+

**अस्थिसञ्चय** पु० मृतस्यास्थ्नां गङ्गाजले प्रक्षेपार्थं सञ्चयः । गङ्गायां प्रक्षेपार्थं प्रथमादिदिने मृतस्य अस्थिसंग्रहे “नान्येद्यु-र्नास्थिसञ्चयः स्मृतिः” ल्युट् । अस्थिसञ्चयनमप्यत्र न० । अस्थिसञ्चयनञ्च प्रथमादिदिनेषु कार्य्यम् । यथाह संवर्त्तः । ‘प्रथमेऽह्नि तृतीये वा सप्तमे नवमे तथा । अस्थिसञ्चयनं कार्य्यं दिने तद्गोत्रजैः सह” । क्वचित् ‘द्वितीये त्वस्थिसञ्चय” इत्युक्तम् । वैष्णवे तु “चतुर्थे दिवसेऽस्थि